ॐ

# बाला विंशति

ऐन्द्रस्येव शरासनस्य दधती

मध्येललाटं प्रभां

शौक्ळीं कान्तिमनुष्णगोरिव

शिरस्यातन्वती सर्वतः

एषासौ त्रिपुरा हृदि द्युतिरिवो-

ष्णांशोसदाहस्थिता

छिन्द्याद्वः सहसा पदैस्त्रिभिरघं

ज्योतिर्मयी वाङ्मयी ॥१॥

aindrasyeva śarāsanasya dadhatī
maddhyelalāṭaṁ prabhāṁ
śauklīṁ kāntimanuṣṇagoriva
śirasyātanvatī sarvataḥ
eṣāsau tripurā hṛdi dyutirivo-
ṣṇāṁśosadāhasthitā
chindyādvaḥ sahasā padaistribhiraghaṁ
jyotirmayī vāṅmayī ||1||

या मात्रा त्रपुसीलतातनुलस-

त्तन्तूत्थितिस्पर्द्धिनी

वाग्बीजे प्रथमे स्थिता तव सदा

ताम्मन्महे ते वयं

शक्तिः कुण्डलिनीति विश्वजनन-

व्यापारबद्धोद्यमां

ज्ञात्वेत्थं न पुनः स्पृशन्ति

जननीगर्भेऽर्भकत्वं नराः ॥२॥

yā mātrā trapusīlatātanulasa-
ttantūtthitisparddhinī
vāgbīje prathame sthitā tava sadā
tāmmanmahe te vayaṁ
śaktiḥ kuṇḍalinīti viśvajanana-
vyāpārabaddhodyamāṁ
jñātvetthaṁ na punaḥ spṛśanti
jananīgarbhe'rbhakatvaṁ narāḥ ||2||

दृष्ट्वा संभ्रमकारि वस्तु सहसा

ऐ ऐ इति व्याहृतं

येनाकूतवशादपीह वरदे

बिन्दुं विनाप्यक्षरं

तस्यापि ध्रुवमेव देवि तरसा

जाते तवानुग्रहे

वाचसूक्तिसुधारसद्रवमुचो

निर्यान्ति वक्त्रोदरात् ॥३॥

dṛṣṭvā saṁbhramakāri vastu sahasā
ai ai iti vyāhṛtaṁ
yenākūtavaśādapīha varade
binduṁ vināpyakṣaraṁ
tasyāpi dhruvameva devi tarasā
jāte tavānugrahe
vācasūktisudhārasadravamuco
niryānti vaktrodarāt ||3||

यन्नित्ये तव कामराजमपरं

मन्त्राक्षरं निष्कळं

तत्सारस्वतमित्यवैति विरळः

कश्चित् बुधस्चेत् भुवि

आख्यानं प्रतिपर्व सत्यतपसो

यत् कीर्त्तयन्तो द्विजाः

प्रारंभे प्रणवास्पदप्रणयिनीं

नीत्वोच्चरन्ति स्फुटं ॥४॥

yannitye tava kāmarājamaparaṁ
mantrākṣaraṁ niṣkaḻaṁ
tatsārasvatamityavaiti viraḻaḥ
kaścit budhascet bhuvi
ākhyānaṁ pratiparva satyatapaso
yat kīrttayanto dvijāḥ
prāraṁbhe praṇavāspadapraṇayinīṁ
nītvoccaranti sphuṭaṁ ||4||

यत् सद्यो वचसां प्रवृत्तिकरणे

दृष्टप्रभावं बुधै-

स्तार्त्तीयं तदहं नमामि मनसा

त्वत्बीजमिन्दुप्रभं

अस्तौर्वोपि सरस्वतीमनुगतो

जाड्यांबुविच्छित्तये

गौश्शब्दो गिरि वर्त्तते स नियतं

यो गं विना सिद्धिदः ॥५॥

yat sadyo vacasāṁ pravṛttikaraṇe
dṛṣṭaprabhāvaṁ budhai-
stārttīyaṁ tadahaṁ namāmi manasā
tvatbījaminduprabhaṁ
astaurvopi sarasvatīmanugato
jāḍyāṁbuvicchittaye
gauśśabdo giri varttate sa niyataṁ
yo gaṁ vinā siddhidaḥ ||5||

एकैकं तव देवि बीजमनघं

सव्यञ्ज्नाव्यन्ज्नं

ॐ

कूटस्थं यदि वा पृथक् क्रमगतं

यद्वा स्थितं व्युत्क्रमात्

यं यं काममपेक्ष्य येन विधिना

केनापि वा चिन्तितं

जप्तं वा सफलीकरोति तरसा

तं तं समस्तं नृणां ॥६॥

ekaikaṁ tava devi bījamanaghaṁ
savyañjnāvyannñjanaṁ
kūṭasthaṁ yadi vā pṛthak kramagataṁ
yadvā sthitaṁ vyutkramāt
yaṁ yaṁ kāmamapekṣya yena vidhinā
kenāpi vā cintitaṁ
japtaṁ vā saphalīkaroti tarasā
taṁ taṁ samastaṁ nṛṇāṁ ||6||

वामे पुस्तकधारिणीमभयदां

साक्षस्रजं दक्षिणे

भक्तेभ्यो वरदानपेशलकरां

कर्प्पूरकुन्दोज्वलां

उज्जृंभांबुजपत्रकान्तिनयन-

स्निग्द्धप्रभालोकिनीं

ये त्वामंब न शीलयन्ति मनसा

तेषां कवित्वं कुतः ॥७॥

vāme pustakadhāriṇīmabhayadāṁ
sākṣasrajaṁ dakṣiṇe
bhaktebhyo varadānapeśalakarāṁ
karppūrakundojvalāṁ
ujjṛṁbhāṁbujapatrakāntinayana-
snigddhaprabhālokinīṁ
ye tvāmaṁba na śīlayanti manasā
teṣāṁ kavitvaṁ kutaḥ ||7||

ये त्वां पाण्दरपुण्डरीकपटल-

स्पष्टाभिरामप्रभां

सिञ्चन्तीममृतद्रवैरिव शिरो

ध्यायन्ति मूर्द्ध्नि स्थितां

अश्रान्तं विकचस्फुटाक्षरपदा

निर्याति वक्त्रोदरात्

तेषां भारति भारती सुरसरित्-

कल्लोललोलोर्म्मिवत्     ॥८॥

ye tvāṁ pāṇdarapuṇḍarīkapaṭala-
spaṣṭābhirāmaprabhāṁ
siñcantīmamṛtadravairiva śiro
dhyāyanti mūrddhni sthitāṁ
aśrāntaṁ vikacasphuṭākṣarapadā
niryāti vaktrodarāt
teṣāṁ bhārati bhāratī surasarit-
kallolalolormmivat     ||8||

ये सिन्दूरपरागपुञ्चपिहितां

त्वत्तेजसा द्यामिमा-

मुर्व्वीन्चापि विलीनयावकरस-

प्रस्तारमग्नामिव

पश्यन्ति क्षणमप्यनन्यमनस-

स्तेषामनंगज्वर-

क्लान्तास्त्रस्तकुरंगशाबकदृशो

वश्या भवन्ति ध्रुवं          ॥९॥

ye sindūraparāgapuñcapihitāṁ
tvattejasā dyāmimā-
murvvīncāpi vilīnayāvakarasa-

prastāramagnāmiva
paśyanti kṣaṇamapyananyamanasa-
steṣāmanaṁgajvara-
kḻāntāstrastakuraṁgaśābakadṛśo
vaśyā bhavanti dhruvaṁ ||9||

चञ्चल् काञ्चनकुण्डलांगदधरा-

माबद्धकाञ्चीस्रजं

ये त्वां चेतसि तत्गते क्षण-

मपिध्यायन्ति कृत्वा स्थिरां

तेषां वेश्मसु विभ्रमादहरह-

स्फारी भवन्त्यश्चिरं

माद्यल् कुञ्चरकर्णताळतरळाः

स्थैर्यं भजन्ते श्रियः ॥१०॥

cañcal kāñcanakuṇḍalāṁgadadharā-
mābaddhakāñcīsrajaṁ
ye tvāṁ cetasi tatgate kṣaṇa-
mapidhyāyanti kṛtvā sthirāṁ
teṣāṁ veśmasu vibhramādaharaha-
sphārī bhavantyaściraṁ
mādyal kuñcarakarṇatāḻataraḻāḥ
sthairyaṁ bhajante śriyaḥ ||10||

आर्भट्या शशिखण्डमण्डितजटा-

जूटान्नृमुण्डस्रजं

बन्धूकप्रसवारुणांबरधरां

प्रेतासनाध्यासिनीं

त्वां ध्यायन्ति चतुर्भुजां त्रिनयना-

मापीनतुंगस्तनीं

मध्ये निम्नवलित्रयाङ्कितततनुं

त्वद्रूपसंवित्तये ॥११॥

ārbhaṭyā śaśikhaṇḍamaṇḍitajaṭā-
jūṭānnṛmuṇḍasrajaṁ
bandhūkaprasavāruṇāṁbaradharāṁ
pretāsanāddhyāsinīṁ
tvāṁ dhyāyanti caturbhujāṁ trinayanā-
māpīnatuṁgastanīṁ
maddhye nimnavalitrayāṅkitatanuṁ
tvadrūpasaṁvittaye ।।11।।

जाताऽप्यलपपरिच्चदे क्षितिभुजां

सामान्यमात्रे कुले

निश्शेषावनिचक्रवर्त्तिपदवीं

लब्ध्वा प्रतापपोन्नतः

यद्विद्याधरवृन्दवन्दितपदः

श्रीवत्सराजोऽभवत्

देवि त्वच्चरणांबुजप्रणतिजः

सोयं प्रसादोदयः ॥१२॥

jātā'pyalapapariccade kṣitibhujāṁ
sāmānyamātre kule
niśśeṣāvanicakravarttipadavīṁ
labdhvā pratāpaponnataḥ
yadvidyādharavṛndavanditapadaḥ
śrīvatsarājo'bhavat
devi tvaccaraṇāṁbujapraṇatijaḥ
soyaṁ prasādodayaḥ ।।12।।

चण्डि त्वच्चरणांबुजार्च्चनकृते

बिल्वीदळोल्लुण्ठन-

त्रुट्यत्कण्टककोटिभिः परिचयं

येषां न जग्मुः कराः

ते दण्डाङ्कुशचक्रचापकुलिश-

श्रीवत्समत्स्याङ्कितैर्-

जायन्ते पृथिवीभुजः कथमिवां-

भोजप्रभैः पाणीभिः ॥१३॥

caṇḍi tvaccaraṇāmbujārccanakṛte
bilvīdaḻolluṇṭhana-
truṭyatkaṇṭakakoṭibhiḥ paricayaṁ
yeṣāṁ na jagmuḥ karāḥ
te daṇḍāṅkuśacakracāpakuliśa-
śrīvatsamatsyāṅkitair-
jāyante pṛthivībhujaḥ kathamivāṁ-
bhojaprabhaiḥ pāṇībhiḥ ||13||

विप्राः क्षोणिभुजो विशस्तदितरे

क्षीराज्यमद्ध्वासवै-

स्त्वां देवि त्रिपुरे परावरमयीं

सन्तर्प्प्य पूजाविधौ

यां यां प्रार्त्थयते मनः स्थिरतया

तेषान्त एते ध्रुवं

तां तां सिद्धिमवाप्नुवन्ति तरसा

विघ्नैरविघ्नीकृताः ॥१४॥

viprāḥ kṣoṇibhujo viśastaditare
kṣīrājyamaddhvāsavai-
stvāṁ devi tripure parāvaramayīṁ
santarppya pūjāvidhau
yāṁ yāṁ prārtthayate manaḥ sthiratayā
teṣānta ete dhruvaṁ
tāṁ tāṁ siddhimavāpnuvanti tarasā
vighnairavighnīkṛtāḥ ||14||

शब्दानां जननी त्वमत्र भुवने

वाग्वादिनीत्युच्यसे

त्वत्तः केशववासवप्रभृतयो-

प्याविर्भवन्ति ध्रुवं

लीयन्ते खलु यत्र कल्पविरमे

ब्रह्मादयस्तेप्यमी

सा त्वं काचिदचिन्त्यरूपमहिमा

शक्तिः परा गीयसे॥ १५॥

śabdānāṁ jananī tvamatra bhuvane
vāgvādinītyucyase
tvattaḥ keśavavāsavaprabhṛtayo-
pyāvirbhavanti dhruvaṁ
līyante khalu yatra kalpavirame
brahmādayastepyamī
sā tvaṁ kācidacintyarūpamahimā
śaktiḥ parā gīyase ||15||

देवानां त्रितयं त्रयी हुतभुजां

शक्तित्रयं त्रिस्वरा-

स्त्रैलोक्यं त्रिपदी त्रिपुष्कर मथो

त्रिब्रह्म वर्णास्त्रयः

यत् किन्चिज्जगति त्रिधा नियमितं

वस्तु त्रिवर्गात्मकं

तत्सर्वं त्रिपुरेति नाम भगव-

त्येन्वेति ते तत्त्वतः ॥ १६ ॥

devānāṁ tritayaṁ trayī hutabhujāṁ
śaktitrayaṁ trisvarā-
strailokyaṁ tripadī tripuṣkara matho
tribrahma varṇastrayaḥ
yat kincijjagati tridhā niyamitaṁ
vastu trrivargātmakaṁ

tatsarvaṁ tripureti nāma bhagava-
tyenveti te tattvataḥ ||16||

लक्ष्मीं राजकुले जयां रणमुखे

क्षेमंकरीमद्ध्वनि

क्रव्यादद्विपसर्प्पभाजि शबरीं

कान्तारदुर्गे गिरौ

भूतप्रेतपिशाचजंभकभये

स्मृत्वा महाभैरवीं

व्यामोहे त्रिपुरां तरन्ति विपद-

स्ताराञ्च तोयप्ळवे ॥१७॥

lakṣmīṁ rājakule jayāṁ raṇamukhe
kṣemaṁkarīmaddhvani
kravyādadvipasarppabhāji śabarīṁ
kāntāradurge girau
bhūtapretapiśācajaṁbhakabhaye
smṛtvā mahābhairavīṁ
vyāmohe tripurāṁ taranti vipada-
stārāñca toyapḻave ||17||

माया कुण्डलिनी क्रिया मधुमती

काळी कला मालिनी

मातंगी विजया जया भगवती

देवी शिवा शांभवी

शक्तिः शङ्करवल्लभा त्रिनयना

वाग्वादिनी भैरवी

ह्रीङ्कारी त्रिपुरा परावरमयी

माता कुमारीत्यसि ॥१८॥

māyā kuṇḍalinī kriyā madhumatī

kāḻī kalā mālinī
mātaṁgī vijayā jayā bhagavatī
devī śivā śāṁbhavī
śaktiḥ śaṅkaravallabhā trinayanā
vāgvādinī bhairavī
hrīṅkārī tripurā parāvaramayī
mātā kumārītyasi ||18||

आ ई पल्लवितैः परस्परयुतैर्-

द्विद्विक्रमादक्षरैः

काद्यः क्षान्तगतैः स्वरादिभिरथ

क्षान्तैश्च तैः सस्वरैः

नामानि त्रिपुरे भवन्ति खलुया-

न्यत्यन्तगुह्यानि ते

तेभ्यो भैरवपत्नि विंशतिसह-

स्रेभ्यः परेभ्यः नमः ॥१९॥

ā ī pallavitaiḥ parasparayutair-
dvidvikramādakṣaraiḥ
kādyaḥ kṣāntagataiḥ svarādibhiratha
kṣāntaiśca taiḥ sasvaraiḥ
nāmāni tripure bhavanti khaluyā-
nyatyantaguhyāni te
tebhyo bhairavapatni viṁśatisaha-
srebhyaḥ parebhyaḥ namaḥ ||19||

बोद्धव्या निपुणं बुधैः स्तुतिरियं

कृत्वा मनस्तत्गतं

भारत्यास्त्रिपुरेत्यनन्यमनसो

यत्राद्यवृत्ते स्फुटं

एकद्वित्रिपदक्रमेण कथित-

स्तत्पादसंख्याक्षरैर्-

ॐ

मन्त्रोद्धारविधिर्विशेषसहितः

सत्सम्प्रदायान्वितः ॥२०॥

boddhavyā nipuṇaṁ budhaiḥ stutiriyaṁ
kṛtvā manastatgataṁ
bhāratyāstripuretyananyamanaso
yatrādyavṛtte sphuṭaṁ
ekadvitripadakrameṇa kathita-
statpādasaṁkhyākṣarair-
mantroddhāravidhirviśeṣasahitaḥ
satsampradāyānvitaḥ ||20||

सावद्यं निरवद्यमस्तु यदि वा

किं वानया चिन्तया

नूनं स्तोत्रमिदं पठिष्यति जनो

यस्यास्ति भक्तिस्त्वयि

सञ्चिन्त्यापि लघुत्वमात्मनि दृढं

सञ्जायमानं हठात्

त्वत्भक्त्या मुखरीकृतेन रचितं

यस्मान्मयापि ध्रुवं ॥२१॥

sāvadyaṁ niravadyamastu yadi vā
kiṁ vānayā cintayā
nūnaṁ stotramidaṁ paṭhiṣyati jano
yasyāsti bhaktistvayi
sañcintyāpi laghutvamātmani dṛḍhaṁ
sañjāyamānaṁ haṭhāt
tvatbhaktyā mukharīkṛtena racitaṁ
yasmānmayāpi dhruvaṁ ||21||

॥ शुभमस्तु ॥